अथ द्वितीयोऽध्याय:। atha dvitīyodhyāyaḥ

सांख्य योग:।। sānkhyayogaḥ

संजय उवाच। sanjaya uvāca

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यमुवाच मधुसूदन:।।२.१

taṁ tathā krupayāviśṭaṁ-aśrupūrṇākulekṣaṇam ।
viṣīdantamidaṁ vākyaṁ uvāca madhusūdanaḥ ।।2.1

श्री भगवानुवाच । śrī bhagavānuvāca ।

कुतस्त्वा कस्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जन।। २.२

kutastvā kaśmalamidaṁ viṣame samupasthitam ।
anāryajuṣṭaṁ asvargyaṁ akīrtikaraṁ arjuna ।।2.2

क्लैब्यं मा स्म गम: पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ट परंतप।। २.३

klaibyaṁ mā sma gamaḥ pārtha naitat-tvay-yupapadyate ।
kṣudraṁ hridaya-daurbalyaṁ tyakvottiṣṭha parantapa ।।2.3

अर्जन उवाच। arjuna uvāca ।

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन।
इषुभि: प्रतियोत्स्यामि पूजार्हावरिसूदन।। २.४

kathaṁ bhīṣmaṁ ahaṁ saṁkhye droṇaṁ ca madhusūdana ।
iṣubhiḥ pratiyotsyāmi pūjārhau arisūdana ।2.4

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके।
हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान्रुदिरप्रदिग्धान्।।२.५

gurūn ahatvā hi mahānubhāvān śreyo bhoktuṁ bhaikyaṁ apīha loke ।
hatvārtha kāmāṁstu gurūnihaiva bhunjīya bhogān-rudhirapradigdhān ।।2.5